संस्कृत-वार्ता:

10.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· लोकसभा-निर्वाचनस्य चतुर्थचरणस्य प्रचाराभियानं तीव्रतां प्राप्नोति। यतो हि दिनद्वयमेव अवशिष्टं वर्तते।

· प्रधानमन्त्रिणा नरेन्द्रमोदिना निगदितं यत् जाति-सम्प्रदाय-धर्माणामाधारे कोऽपि भेदभाव: नैव भवितव्य:।

· अद्य सर्वोच्चन्यायालयेन मद्य-नीति-प्रवंचना-सम्बद्धे जाते प्रकरणे दिल्ल्या: मुख्यमन्त्रिणे अरविन्द-केजरीवालाय एकविंशति: दिवसेभ्य: अल्पकालिक-मुक्ति: प्रदत्ता।

· केरलतः आवर्तदेशेभ्य: प्रचल्यमाणा: एयर इण्डिया एक्स्प्रेस् विमानसेवाः अद्यापि बाधिताः, यद्यपि कर्मचारि विमानसेवाप्रबन्धनयोः च मध्ये पारस्परिकी मन्त्रणापि समनुष्ठिता ।

· आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायाम् अद्य अहमदाबादस्य नरेन्द्रमोदी क्रीडांगणे गुजरात टाइटंस चेन्नई-सुपर-किंग्स दलयो: मध्ये स्पर्धा भविष्यति।

<u>नैर्वाचनिकप्रचाराभियानम्</u>

लोकसभा-निर्वाचनस्य चतुर्थचरणस्य प्रचाराभियानं तीव्रतां प्राप्नोति। यतो हि दिनद्वयमेव अवशिष्टं वर्तते। अस्मै चरणाय मतदानम् अस्य मासस्य त्रयोदश दिनांके षण्णवति: आसनेभ्य: नवराज्येषु एकस्मिन् च केन्द्रशासितप्रदेशे मतदानानि सम्पाद्यन्ते। आन्ध्रप्रदेशस्य पंचविंशति: , तेलंगानाया: सप्तदश, उत्तरप्रदेशस्य त्रयोदश, महाराष्ट्रस्य एकादश, मध्यप्रदेश-पश्चिमबंग-राज्ययो: अष्ट, बिहारस्य पंच, झारखण्ड-ओडिशयो: चत्वारि, जम्मूकश्मीरस्य च एकस्मै आसनाय मतदानं अस्मिन्नेव चरणे समनुष्ठीयते। वैविध्यानां राजनीतिकदलानां सुप्रसिद्धनेतार: देशस्य विभिन्नेषु भागेषु नैर्वाचनिक जनसभा: सम्पादयन्ति। प्रधानमन्त्री भाजपेतिदलस्य च वरिष्ठनेता श्रीमोदी महाराष्ट्रराज्यस्य आदिवासिसंख्यके क्षेत्रे नन्दुरबार-जनपदे भाजपादलस्य प्रत्याशिने हीना गाविताय एकां जनसभां सम्बोधयिष्यति। एतदतिरिच्य असौ नारायणपेट-हैदराबाद-नगरयो: अद्य जनसमूहमेकं वक्ष्यति। अद्य सायं हैदराबादस्य एल.बी.क्रीडांगणे समायोक्ष्यमाणा सभा तेलंगानाराज्ये श्रीमोदिन: अन्तिमा नैर्वाचनिक जनसभा भवेदिति।

नैर्वाचनिक प्रचारावधौ प्रथमवारं समाजवादी पार्टीप्रमुख: अखिलेशयादव: कांग्रेसदलस्य च पूर्वाध्यक्ष: राहुलगांधी अद्य संयुक्तरूपेण कन्नौज-कानपुर-लखनऊ-नगरेषु जनसभा: सम्बोधयिष्यत:।

प्रधानमन्त्री-साक्षात्कार:

प्रधानमन्त्रिणा नरेन्द्रमोदिना निगदितं यत् जाति-सम्प्रदाय-धर्माणामाधारे कोऽपि भेदभाव: नैव भवितव्य:। प्रधानमन्त्री भाजपेतिदलस्य च वरिष्ठनेता नरेन्द्रमोदी कांग्रेसदले आक्षिप्तवान् यत् एतद्दलं धार्मिकारक्षणं निध्याय संविधानपरिवर्तनम् इच्छति। एकस्मिन् सर्वकारीयेतर – वार्ता-वाहिन्यै प्रदत्ते साक्षात्कारे श्रीमोदी प्रावोचत् यत् अनेन तस्य च प्रशासनेन कदापि न भाषित: यत् तस्य प्रशासनं संविधान परिवर्तनं करिष्यति। तेनोदीरितं यत् अभिव्यक्ति- स्वतन्त्रतायां परिवर्तनं कृत्वा कांग्रसदलेन पूर्वमेव संविधानस्य मूलभावना घातिता।

सर्वोच्चन्यायालय:-केजरीवाल:

अद्य सर्वोच्चन्यायालयेन मद्य-नीति-प्रवंचना-सम्बद्धे जाते प्रकरणे दिल्ल्या: मुख्यमन्त्रिणे अरविन्द केजरीवालाय एकविंशति: दिवसेभ्य: अल्पकालिक-मुक्ति: प्रदत्ता। अनेन शीर्षन्यायलयेन आपदलप्रमुख: सप्तमचरणस्य लोकसभा-निर्वाचनस्य समाप्तेरेनन्तरं एकदिवसानन्तरमेव जूनमासस्य द्वितीयेदिनांके आत्मसर्पणाय कथित:। अवधेयं वर्तते यत् केजरीवालेन प्रचल्यमाणस्य लोकसभा-निर्वाचनस्य प्रचाराय मुक्ति-याचिका अभ्यर्थिता।

उत्तराखण्ड-केदारनाथ:

अद्य उत्तराखण्डे पवित्रा चतुर्धाम यात्रा प्रारम्भा। अक्षयतृतीयायाः शुभावसरे केदारनाथ-गङ्गोत्री-यमुनोत्री-इत्येतेषां पवित्रद्वाराणि श्रद्धालूनां तीर्थयात्रिणां च कृते उद्घाटितानि। अद्य प्रातः केदारनाथधाम्न: द्वारं वैदिकमन्त्रोच्चारणै: पारम्परिकानुष्ठानादिभि: च उद्घाटितम्, येन चतुर्धामयात्रा समारब्धा। भक्तानां सम्मर्दम् अवलोक्य मुख्यमन्त्री पुष्करसिंहधामी, तीर्थयात्रिणां कृते, अन्ताराज्यीय-अन्ताराष्ट्रीययोः सौविध्यानां सम्वर्धनाय सर्वकारस्य दृढप्रतिबद्धतां बोधितवान्। केदारनाथदेवालये उद्घाटनसमारोहः प्रातः ऊनविंशति निमेषाधिक दश वादने यमुनोत्रीतीर्थ-द्वारस्य अनावरणं कृतम्, तदनन्तरं मध्याह्ने गङ्गोत्री धाम-द्वारस्य उद्घाटनं जातम्।

भारत-कान्स-चलचित्रमहोत्सव:

भारतं फ्रांसदेशे भविष्यमाणे सप्तसप्ततितमे कान्स-चलच्चित्र महोत्सवे भागं स्वीकरिष्यति। फ्रांसदेशे अयं महोत्सव: मासस्यास्य चतुर्दशदिनांकत: पंचविंशतिदिनांकपर्यन्तम् प्रचलिष्यति। भारतसर्वकारस्य भारतीय-प्रतिनिधिमण्डलस्य राज्यसर्वकारस्य उद्योगस्य च सचिवा: सम्मिलिता: वर्तन्ते। ये विश्वस्य चलच्चित्रापणे अस्मिन् भारतस्य रचनात्मकार्थव्यवस्थां प्रदर्शयिष्यन्ते। सूचनाप्रसारणमन्त्रालय: कथितवान् यत् भारतदेश: प्रथमवारं कान्स-चलच्चित्र-महोत्सवे एतस्मिन् भारतपर्व इत्येतस्यातिथित्वं भजिष्यति।

रूसः प्रधानमन्त्री -पुनः नियुक्तिः

रूसदेशे राष्ट्रपतिना व्लादिमीर् पुतिनेन अद्य मिखाइल-मिशु-स्तिन इत्यस्मै देशस्य प्रधानमन्त्रीपदाय पुनर्नियुक्तेः प्रस्तावः प्रदत्तः। रूसदेशस्य संसद:अध्यक्षेण व्याचेस्लाव वोलोडिन इत्यनेन घोषितं यत् अन्यस्मिन् सत्रे मिशुस्तिनस्य स्टेट ड्यूमा-पक्षे अभ्यर्थीविषये चर्चा पश्चादेव भविष्यति। रूसस्य करसेवायाः पूर्वप्रमुखः मिशुस्तिन: विगतचतुर्वर्षेभ्यः एतत् कार्यं निर्वहति। सः गतमङ्गलवासरे स्वमन्त्रिमण्डलस्य त्यागपत्रं प्रदत्तवान्, यदा श्रीपुतिन: पञ्चमं राष्ट्रपतिपदस्य कार्यकालस्य आरम्भं कृतवान्। क्रेमलिन-नियन्त्रित-संसदि मिशुस्तिनस्य समर्थनं केवलं औपचारिकमेव ।

केरल-ए आई एक्स्प्रेस् :

केरलतः आवर्तदेशेभ्य: प्रचल्यमाणा: एयर इण्डिया एक्स्प्रेस् विमानसेवाः अद्यापि बाधिताः, यद्यपि कर्मचारि विमानसेवाप्रबन्धनयोः च मध्ये पारस्परिकी मन्त्रणापि समनुष्ठिता । अद्य प्रातः कोचीन-अन्ताराष्ट्रीयविमानस्थानके दम्मम्-मस्कट्-नगरयोः विमानयानानि निरस्तीकृतानि सन्ति। कन्नूर-अन्ताराष्ट्रीयविमानस्थानके शारजाह, मस्कट्, दम्मम्, दुबई, रियाद्, अबुधाबी इत्यादीनां कृते विमानसेवाः निरस्ता: तिरुवनन्तपुरमतः मस्कट्-दोहा-नगरं प्रति अन्ताराष्ट्रीयविमानयानानि अपि निरस्तीकृतानि सन्ति। कलिकट-अन्ताराष्ट्रीयविमानस्थानकेन अन्ताराष्ट्रीयक्षेत्रे पञ्च विमानयानानि निरस्तीकृतानि सन्ति ।

आई.पी.एल्

आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायाम् अद्य अहमदाबादस्य नरेन्द्रमोदी क्रीडांगणे गुजरात टाइटंस चेन्नई-सुपर-किंग्स दलयोः मध्ये स्पर्धा भविष्यति। स्पर्धायाः प्रसारणम् सार्ध-सप्तवादने भविष्यति। गतरात्रौ हिमाचल-प्रदेशे धर्मशालायाम् आयोजिते द्वन्द्वे रॉयल्-चैलेंजर्स-बेंगलूरु-दलेन पंजाब-किंग्स्-दलं षष्टिःधावनाङ्कैः पराजितम्।

राष्ट्रियमहिलायोगः-पत्रं

राष्ट्रिय महिलायोगेन अद्य निर्वाचनायोगेन कथितं यत् सन्देशखाली स्थले तत्रस्थ-महिलाभ्यः तृणमूल-कांग्रेस-दल-कार्यकर्तृभिः प्रदत्तसंचेतानायाः कारणेन महिलाभिः स्वीयपरिवेदना न परावर्तितव्या। निर्वाचनायोगाय लिखिते एकस्मिन् पत्रे महिलायोगेन निष्पादितं यत् सन्देशखाली स्थानके महिलाः लोकसभा-निर्वाचनस्य समये स्वीय-परिवेदना-प्रत्यावर्तनाय प्रभाविताः क्रियन्ते। मानसिक बलमपि प्रदीयते। आयोगेन उचितकार्याचरणायापि निर्देशः प्रख्यापितः।

।। इति वार्ताः ।।